# Shambhukritam Hari Stotram

# શમ્ભુકૃતં હરિસ્તોત્રમ્

## Document Information

Text title : Shambhukritam Hari Stotram

File name : shambhukRRitaMharistotram.itx

Category : vishhnu, vishnu, lakShmInArAyaNIyasaMhitA, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 1 | adhyAya 553/2-24||

Latest update : February 5, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 5, 2026

*sanskritdocuments.org*

# શમ્ભુકૃતં હરિસ્તોત્રમ્

ૐ નમોઽક્ષરવાસાય પરધામ્નિ વિરાજતે ।
પરેશાય કિશોરાય મુક્તેશાય નમોઽસ્તુ તે ॥ ૨॥

શુદ્ધાય મૂલરૂપાયાઽનન્તાય તે નમો નમઃ ।
સર્વરૂપસ્વરૂપાય સહસ્રબાહવે નમઃ ॥ ૩॥

સહસ્રરશ્મિયુક્તાય વેધસે શુદ્ધકર્મણે ।
વિશાલદેહવાસાય વિશ્વાર્ત્તિહારિણે નમઃ ॥ ૪॥

સહસ્રાર્કસ્વરૂપાય શમ્ભવે તૈ નમો નમઃ ।
સમસ્તવિદ્યાવાસાય ચક્રિણે તે નમો નમઃ ॥ ૫॥

સદા સમસ્તગીર્વાણૈર્નુતે કૃષ્ણાય તે નમઃ ।
અનાદિને ભૂપતયેઽચ્યુતાય શેષવાસિને ॥ ૬॥

મરુતાં પતયે સર્વપતયે તે સદા નમઃ ।
જલેશાય ક્ષિતીશાય વિશ્વનેત્રાય તે નમઃ ॥ ૭॥

શશાઙ્કાય ચ સૂર્યાય વિશ્વેશ્વરાય તે નમઃ ।
અપ્રતર્ક્યસ્વરૂપાયાઽમૃતરૂપાય તે નમઃ ॥ ૮॥

દિગન્તરપ્રકાશાય હૃદમ્બરાય તે નમઃ ।
નારાયણાઽયનાયેતિ વિશ્વતોમુખિને નમઃ ॥ ૯॥

દેવાર્તિહારિણેઽસઙ્ખ્યવક્ત્રાય વિષ્ણવે નમઃ ।
પુરાણાય મહેશાય જગત્પ્રસૂયતે નમઃ ॥ ૧૦॥

કોટિદેહિષુ કૈશ્ચિત્ ત્વં સન્માર્ગિભિરુપાસ્યસે ।
એકો ભવાન્ પ્રકૃતેશ્ચ પરાદક્ષરતઃ પરઃ ॥ ૧૧॥

વિદામગ્રેસરઃ સર્વવિજ્ઞો વિશાલમૂર્તિકઃ ।
સૂક્ષ્મરૂપો ગુણા યત્ર પ્રાકૃતા ન વસન્તિ હિમ્ ॥ ૧૨॥

વાચા ન વિષયો યશ્ચ ભક્તવાગ્વિષયોઽસ્તિ સઃ ।
ન ચ કર્માઽભિભૂતો યઃ કરોતિ સતતં સૃજિમ્ ॥ ૧૩॥

અનિન્દ્રિયોઽપિ ચેન્દ્રાદ્યૈરુપાસ્યશ્ચેન્દ્રિયાદિમાન્ ।
અસારેઽપિ ચ સંસારે સારરૂપોઽસ્તિ વૈ ભવાન્ ॥ ૧૪॥

યજદ્ભિરવસીયેતાઽતાદૃશોઽપિ ચતુર્ભુજઃ ।
પરં રૂપં ન જાનીમો જાનીમો દૃષ્ટિગોચરમ્ ॥ ૧૫॥

અવતારતનું વિદ્મસ્તદ્દ્વારાઽઽશ્રયમાપ્નુમઃ ।
અબ્જયોનિસ્તવ વર્ષ્મ નૈવ વેદ ન ચાપ્યહમ્ ॥ ૧૬॥

વેદ્મિ વિશુદ્ધતપસા પુરાણં કવિમીશ્વરમ્ ।
અહં પદ્માસનાદ્યાશ્ચ પ્રસૂતાશ્ચાસકૃદ્વિભોઃ ॥ ૧૭॥

બાલેનૈવ મયા ચાન્યૈઃ સમ્બુદ્ધ્યસે ન કીદૃશઃ ।
નત્યા તુષ્ટિં પ્રગચ્છામઃ સ્તુત્યા તૃપ્તાશ્ચ વૈદિકાઃ ॥ ૧૮॥

જન્માન્તરવિવેકોત્થત્વત્પ્રસાદાન્મતિર્યદિ ।
લબ્ધલાભા ભવેત્તેન શિવં સ્યાદ્બ્રહ્મપારગમ્ ॥ ૧૯॥

સૂક્ષ્મઃ સ્થૂલો ભવઁશ્ચાઽદ્ય મમ નેત્રસ્ય ભૂરભૂઃ ।
દૃષ્ટોઽસિ કૃતકૃત્યોઽહં સુલભો મેઽદ્ય ભાગ્યતઃ ॥ ૨૦॥

નતોઽસ્મિ દણ્ડવદ્વિષ્ણોઽર્પિતોઽસ્મિ પાદયોસ્તવ ।
સ્તુતિં જુષસ્વ ભક્તસ્ય જનાર્દન! વિશેષતઃ ॥ ૨૧॥

સૃષ્ટિં સૃજસ્વ વૈ બ્રહ્મા નિદેશમકરોન્મમ ।
દેહિ તદ્વિજ્ઞતાં સાર્વભૌમીં સૃજામિ સેવયા ॥ ૨૨॥

હૃદિસ્થોઽસિ નમસ્તેઽસ્તુ બહિઃષ્ઠોઽસ્મિ નમામિ તે ।
સર્વગસ્ય ન ચાત્રાઽસ્તિ વ્યવસ્થા મત્પૃથક્ તવ ॥ ૨૩॥

ઇતિ પ્રકાશં સ્તવનં બુદ્ધ્વાઽઽન્તરં ચ વાચિકમ્ ।
ભીતં પુનીહિ ભગવન્ તવાસ્મીતિ વિભાવય ॥ ૨૪॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાં પ્રથમે કૃતયુગસન્તાને ૫૫૩-અધ્યાયાન્તર્ગતં
શમ્ભુકૃતં હરિસ્તોત્રં સમ્પૂર્ણમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૧। અધ્યાય ૫૫૩/૨-૨૪॥

lakShmInArAyaNIyasaMhitA . khaNDa 1. adhyAya 553/2-24..

Proofread by PSA Easwaran

*Shambhukritam Hari Stotram*

pdf was typeset on February 5, 2026

Please send corrections to *sanskrit@cheerful.com*